# श्री जयतीर्थाचार्यविरचित

(श्री व्यासराज मठाधीश श्री विद्यावाचस्पतितीर्थरु)

# श्रीकावेरि वैभव :-

एकदैव समुद्भूताः पयोब्धेः कतिशीकराः ।
तत्संख्यातीर्थ तोयौघं वहत्यद्धा कवेरजा ॥

कावेरी वीचयोनद्यः अवर्ताश्च जलाशयाः ।
देवतावालुकास्तस्यास्सर्वतीर्थाधिका च सा ॥

तुलामासेतु कावेरीं प्रशंसंतिमहर्षयः ।
दिविदेवाश्च पितरः सादुसाध्विति हर्षिताः ॥

कावेरी तीरजन्मानो मृगपक्षिमहीरुहाः ।
तद्वारिशीतवातैश्च स्पृष्ट्वा मुक्तिं प्रयांति हि ।

तुलायां सह्यजास्नानुन्मिक्तिरेव न संशयः ।
तिस्रःकोव्यर्धकोव्यश्च तीर्थानि भुवनत्रये ।

तानिसर्वाणि राजेंद्र पुरस्कृत्य तु जाह्नवीं ॥

केशवस्याज्ञया यांति तुलामासे मरुद्वृधां ॥

तुलामासे सकृत्स्यातियः कवेरसुताजले ।
प्रभाते पतितोवापि विष्णुलोके महीयते ॥

कावेरि कपिलासंगं संस्मरन्नन्यवारिषु ।
तस्मिन् स्नानफलं प्राप्य सर्वपापैः प्रमुच्यते ॥

कावेर्यां स्नातियो मूडः श्रीरंगेशस्य सन्निधौ ।
ब्रह्मघ्नोवा सुरापोवा सर्वपापैः प्रमुच्यते ॥

श्रीरंगेवापि संगेवा मायूरेवापि पापधीः ।
तुलार्के स्नाति शुद्धात्मा ब्रह्मलोके महीयते ॥

कावेरी महिमालेशः सूचितोत्रमयातव ।
पठेद्वा पुन्यकावेर्या माहात्म्यं श्रुणुयाश्चयः ।
नामंगलं न दारिद्र्यं तस्यवंशे कदाचन ॥

लोकास्समस्ताः सुखिनोर्भवंतु ॥ श्री कृष्णार्पणमस्तु ॥